7 सुभाषितानि

R9E6Z2

पुस्तकेषु हि या विद्या परहस्तेषु यद् धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्॥ १॥
वृक्षः फलान्वितः भाति वृक्षं धूनयते कपिः
वृक्षेण वार्यते तापः जलं वृक्षाय दीयते।
वृक्षात् पतन्ति पर्णानि वृक्षस्य प्रसरो महान्
वृक्षे खगाः निकूजन्ति वृक्ष धन्योऽसि भूतले॥ २॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥ ३॥
पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः॥ ४॥
गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु मे मङ्गलम्॥ ५॥
घृष्टं घृष्टं पुनरपि पुनःचन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम्॥ ६॥

टिप्पणी

परहस्तेषु પારકાના હાથમાં **भाति** શોભે છે. **कार्यकाले समुत्मन्ने** જ્યારે જરૂરિયાત ઊભી થાય ત્યારે **धूनयते** હલાવે છે. **कपिः** વાનર **वार्यते** દૂર કરાય છે. **दीयते** અપાય છે. **प्रसरः** ફેલાવો **भूतले** પૃથ્વી પર **रिपुः** દુશ્મન **अम्भः** જળ **सस्यम्** અનાજ **वारिवाहा** વાદળો **सताम्** સજ્જનોની **घृष्टम्** ઘસેલું **इक्षुदण्डम्** શેરડી નો સાંઠો **दग्धम्** બાળેલું

सन्धयः

धन्योऽसि	–	धन्यः असि	नादन्ति	–	न अदन्ति
कस्यचिन्मित्रं	–	कस्यचित् मित्रम्	पुनरपि	–	पुनः अपि
रिपवस्तथा	–	रिपवः तथा	पुनश्चन्दनम्	–	पुनः चन्दनम्
स्वयमेव	–	स्वयम् एव	चैवेक्षुदण्डम्	–	च एव इक्षुदण्डम्
नाम्भः	–	न अम्भः			

D6V5U9

स्वाध्यायः

1. નીચેના શબ્દોનું શુદ્ધ ઉચ્ચારણ કરો :

समुत्पन्ने, निकूजन्ति, कस्यचिन्मित्रम्, समुद्रसहिताः, चैवेक्षुदण्डम्, काञ्चनम्

2. નીચે આપેલા પ્રશ્નોના જવાબ લખો :

(1) कीदृशी विद्या कार्यकाले उपयुक्ता न भवति ?

(2) कस्य विभूतयः परोपकाराय सन्ति ?

(3) वृक्षे के निकूजन्ति ?

(4) मित्राणि तथा रिपवः केन जायन्ते ?

(5) पञ्चनदीनां नामानि लिखतु।

(6) सज्जनानां किं विकृतं न भवति ?

3. સંધિ છૂટી પાડીને લખો :

(1) धन्योऽसि (2) कस्यचिन्मित्रम्

(3) स्वयमेव (4) पुनरपि

4. સંધિયુક્ત શબ્દ લખો :

(1) रिपवः + तथा

(2) पुनः + चन्दनम्

(3) न + अम्भः

(4) च + एव + इक्षुदण्डम्

(5) न + अदन्ति

5. નીચેના ધાતુઓને ઉદાહરણમાં બતાવ્યા પ્રમાણે લખો :

ઉદાહરણ : पत् – पतन्ति

(1) पा –	(5) लिख् –
(2) खाद् –	(6) दृश् (पश्य्) –
(3) गर्ज् –	(7) पठ् –
(4) वद –	(8) नम् –

6. કૌંસમાં આપેલ શબ્દોનો ઉપયોગ કરી ખાલી જગ્યા પૂરો :

(जलम्, अन्नम्, पुष्पाणि, रसम्, फलानि)

(1) वारिवाहाः स्वयं _____ न खादन्ति।

(2) नद्यः स्वयं _____ न पिबन्ति।

(3) वृक्षाः स्वयं _____ न खादन्ति।

(4) पादपाः स्वयं _____ न जिघ्रन्ति।

(5) मधुमक्षिकाः स्वयं _____ न पिबन्ति।

7. પાદપૂર્તિ કરો :

(1) पुस्तकेषु हि _____ ।
_____ न तद् धनम्॥

(2) पिबन्ति नद्यः _____
_____ ।
_____
_____ सतां विभूतयः॥

8. સુભાષિતોનું સસ્વર શુદ્ધ ઉચ્ચારણ સાથે જૂથમાં, સમૂહમાં અને વ્યક્તિગત ગાન કરો.

પ્રવૃત્તિ/પ્રોજેક્ટ-વર્ક :

- પુસ્તકાલયની મુલાકાત લઈ 'સુભાષિતરત્નાવલી' અથવા સુભાષિતને લગતા અન્ય ગ્રંથો કે વર્તમાનપત્રોમાંથી કોઈ પણ પાંચ સુભાષિત શોધીને લખો.
- અહીં સુભાષિતમાં વ્યક્ત થયેલા વિચારોને અનુરૂપ કહેવતો કે રૂઢિપ્રયોગો જે આપના વિસ્તારમાં બોલાતા હોય તે એકત્રિત કરો અને વર્ગખંડમાં રજૂ કરો.
- સ્થાનિક નદી, જલસ્રોતની વિગતો એકઠી કરો.
- પ્રોજક્ટ-વર્ક : વર્ગના વિદ્યાર્થીઓનાં વિવિધ જૂથ બનાવી સુભાષિતો એકત્રિત કરી હસ્તલિખિત અંક તૈયાર કરો.